# मानसं मम विकसितं कुरु

अस्माकं शरीरं रथवत् अस्ति। पञ्च अश्वाः एनं वहन्ति-चक्षुः, श्रोत्रम्, नासिका, जिह्वा, त्वक् च। मनः एतैः संसारस्य विषयाणाम् उपभोगाय मनुष्यं प्रेरयति। यदि मनुष्यः मनः संयम्य विवेकेन कार्यं करोति तदा जीवने सुखं प्राप्नोति। यदि अविवेकेन कार्यं करोति तदा जीवनं नश्यति। अतः मनसः विकासः अपेक्षितः। वेदेषु अपि कथितम्-तन्मे मनः शिवसङ्कल्पमस्तु। गीतायामपि उक्तम् -

असंशयं महाबाहो, मनो दुर्निग्रहं चलम्

अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥

अतः कविवरः रवीन्द्रठाकुरमहाभागाः एतस्यां कवितायां मनसः विकासार्थम् ईश्वरं प्रति प्रार्थनां करोति।




मानसं मम विकसितं कुरु
मानसचर हे।

कुरु निर्मलम् उज्ज्वलम् अयि
चिर सुन्दर हे।

उद्यतम् अतिप्रबुद्धम् अपि
निर्भयं कुरु हे।

सुशिवम् अनलसम् अति
निःसंशयं कुरु हे।

आन्तरं मम विकसितं कुरु
आन्तरतर हे।

योजय मां निखिलसङ्गे
मुञ्च हे मम बन्धनम् ।
सञ्चारय सकलकर्मसु
शान्तं तवच्छन्दः ।

चरणपद्मे चित्तं मम
निष्पन्दितं कुरु हे ।

कुरु नन्दितम्, अतिनन्दितम्,
अभिनन्दितम् हे ।

आन्तरं मम विकसितं कुरु
आन्तरतर हे ।

## *अन्वयः*

हे मानसचर मम मानसम् विकसितम् कुरु ।

हे अयि चिर सुन्दर (मम मानसं) उज्ज्वलम् निर्मलम् कुरु ।

हे उद्यतम् अतिप्रबुद्धम् अपि निर्भयम् कुरु ।

हे सुशिवम् अनलसम् अति निःसंशयम् कुरु ।

हे आन्तरतर मम आन्तरम् विकसितम् कुरु ।

माम् निखिलसङ्गे योजय, मम बन्धनम् मुञ्च ।

सकलकर्मसु सञ्चारय, शान्तम् तव छन्दः ।

हे मम चित्तम् चरणपद्मे निष्पन्दितम् कुरु ।

हे नन्दितम्, अतिनन्दितम्, अभिनन्दितम् कुरु ।

हे आन्तरतर ! मम आन्तरम् विकसितम् कुरु ।

## *अनुप्रयोगः*

1. द्वौ छात्रौ अधोलिखितान् शब्दान् अधिकृत्य अन्योन्यं श्रुतलेखं कारयताम् -

| | ***प्रथमः छात्रः*** | ***द्वितीयः छात्रः*** |
|---|---|---|
| क. | उज्ज्वलः | ............................... |
| ख. | ............................... | सञ्चारय |
| ग. | निःसंशयम् | ............................... |
| घ. | ............................... | मुञ्च |
| ङ | चरणपद्मे | ............................... |
| च. | निष्पन्दितं | ............................... |
| छ. | ............................... | निर्भयम् |
| ज. | ............................... | नन्दितम् |
| झ. | निखिलसङ्के | ............................... |
| ञ. | अतिप्रबुद्धम् | ............................... |
| ट. | तवच्छन्दः | ............................... |
| ठ. | ............................... | निर्मलम् |
| ड | ............................... | अभिनन्दितम् |
| ढ. | ............................... | बन्धनम् |
| ण. | उद्यतम् | ............................... |
| त. | ............................... | सुशिवम् |
| थ. | अनलसम् | ............................... |
| द. | ............................... | शान्तम् |

**2. अनलसम्, अप्रियः, अनुपस्थितः, अनेकः, अनृतम्, अनिच्छा, अशिक्षितः, असत्यम्, अविवेकः, अनीश्वरः, अनधीत्य, अस्वस्थः।**

उपरि नञ् तत्पुरुषस्य उदाहरणानि दत्तानि। 'अ' - अन् परिवर्तनम् अधिकृत्य पदानि पृथक् - पृथक् स्तम्भे लिखन्तु

'न' स्थाने 'अन्' भवति यदि परे शब्दस्य प्रथमवर्णः स्वरः भवति। यथा न उचितम्=अनुचितम्

'न' स्थाने 'अ' भवति यदि परे प्रथमः वर्णः व्यञ्जनं भवति। न सत्यम्=असत्यम्।

| | ***खण्डः 'अ'*** | ***खण्डः 'ब'*** |
|---|---|---|
| | यथा - अनलसम् | अप्रियः |
| (i) | .............................. | .............................. |
| (ii) | .............................. | .............................. |
| (iii) | .............................. | .............................. |
| (iv) | .............................. | .............................. |
| (v) | .............................. | .............................. |
| (vi) | .............................. | .............................. |
| (vii) | .............................. | .............................. |
| (viii) | .............................. | .............................. |

**3. अधस्तात् केषांचित् पदानां विग्रहाः समासनामानि च दीयन्ते। पाठं पठित्वा तेषां समस्तपदानि लिख्यन्ताम्**

| | ***विग्रहः*** | ***समासनाम*** | ***समस्तपदम्*** |
|---|---|---|---|
| क. | चरणौ पद्मे इव | कर्मधारयः | .............................. |
| ख. | निर्गतं मलं यस्मात् तत् | बहुव्रीहिः | .............................. |
| ग. | सकलेषु कर्मसु | कर्मधारयः | .............................. |
| घ. | निर्गतः संशयः यस्मात् तत् | बहुव्रीहिः | .............................. |
| ङ. | मानसे चरति | उपपदतत्पुरुषः | .............................. |

| | | | |
|---|---|---|---|
| च. | निर्गतं भयं यस्मात् तत् | बहुव्रीहिः | .............................. |
| छ. | निखिलानां सङ्घे | षष्ठीतत्पुरुषः | .............................. |
| ज. | निर्गतं स्पन्दितं यस्मात् तत् | बहुव्रीहिः | .............................. |

**4.अ. मञ्जूषायाः समुचितपदानां चयनं कृत्वा अधोदत्तशब्दानां प्रत्येकं पदस्य त्रीणि समानार्थकपदानि लिखन्तु**

| | | |
|---|---|---|
| शुद्धम् | मनः | वारिजम् |
| गतिहीनम् | भयरहितम् | अखिलम् |
| चित्तम् | पवित्रम् | प्रफुल्लितम् |
| निर्भीकम् | जलजम् | निश्चलम् |
| विकचम् | प्रमुदितम् | अन्तरम् |
| अम्बुजम् | सर्वम् | स्तब्धम् |
| सम्पूर्णम् | अभयम् | विमलम् |

| | | | | |
|---|---|---|---|---|
| क. | निर्मलम् | .............................. | .............................. | .............................. |
| ख. | मानसम् | .............................. | .............................. | .............................. |
| ग. | विकसितम् | .............................. | .............................. | .............................. |
| घ. | निर्भयम् | .............................. | .............................. | .............................. |
| ङ. | निष्पन्दितम् | .............................. | .............................. | .............................. |
| च. | पद्मम् | .............................. | .............................. | .............................. |
| छ. | निखिलम् | .............................. | .............................. | .............................. |

**ब. अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत –**

| | | |
|---|---|---|
| क. | .............................. | उत् + ज्वलम् |
| ख. | सञ्चारय | .............................. + .............................. |

ग. .............................. तव + छन्दः

घ. निः संशयम् .............................. + ..............................

ङ. .............................. नि + स्पन्दितम्

◦ 'मनः' पदे मूलशब्दः मनस् इति वर्तते ।

◦ 'मनस्' – 'पयस्' – 'तपस्' शब्दाः नपुंसकलिंङ्गे सन्ति ।

◦ मनसः विशेषणपदानि अपि नपुंसकलिङ्गे सन्ति ।

यथा – उज्ज्वलं मनः, सुशिवं मनः, निर्भयं मनः ।

**5. मनसः पञ्चविशेषणानि पाठात् चित्वा लिखन्तु –**

क. ..............................

ख. ..............................

ग. ..............................

घ. ..............................

ङ. ..............................

**6. अधोलिखितबङ्गलाशब्दानां तत्समसंस्कृतरूपाणि पाठात् चित्वा लिखत –**

| | बङ्गलाभाषायाः शब्दाः | संस्कृतभाषायाः शब्दाः |
|---|---|---|
| *यथा* | *विकोशितो* | *विकसितम्* |
| क. | ऑन्तॉरो | .............................. |
| ख. | मॉमो | .............................. |
| ग. | निश्पोन्दितो | .............................. |
| घ. | नोन्दितो | .............................. |
| ङ. | बॉन्धो | .............................. |
| च. | शॉकाल | .............................. |

छ. चित्तो ..............................

ज. उज्जॉलो ..............................

झ. उद्धॉतो ..............................

ञ. चॉरोणोपॉद्दे ..............................

## 7. पूर्णवाक्येन उत्तरत -

क. कविः आत्मानं कस्मिन् योजयितुम् इच्छति ?

ख. ईश्वरस्य छन्दः कीदृशम् अस्ति ?

ग. कस्य विकासार्थम् अत्र प्रार्थना क्रियते ?

घ. मम चित्तं कुत्र संलग्नं स्यात् ?

ङ कविः ईश्वरं किम् निर्भयं कर्तुं कथयति ?

## 8. मञ्जूषातः चित्वा अधोलिखितसारांशं पूरयत -

भक्तः हृदये निवसन्तं .............................. प्रार्थयते यत् हे अन्तर्यामिन् परमेश्वर ! मम सङ्कीर्णं .............................. विकसितं कुरु। तव कृपया .............................. उज्ज्वलं निर्भयं, .............................. निरतं, .............................. हीनम्, उद्योगपरं सन्देहरहितं, बन्धनमुक्तम्, उदारम् अतिसन्तुष्टं सर्वेषां ................ च भवतु। हे प्रभो मम .................. निजचरणकमले स्थिरं कुरु।

**मञ्जूषा**

मानसं, परमेश्वरं, शुभकर्मसु,

मनः, आलस्येन, प्रियं,

एतत्।

**9. आज्ञार्थे लोट् लकारः प्रयुज्यते। 'कृ' धातोः लोट् लकारे रूपाणि –**

| | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| *प्रथमः पुरुषः* | करोतु | कुरुताम् | कुर्वन्तु |
| *मध्यमः पुरुषः* | कुरु | कुरुतम् | कुरुत |
| *उत्तमः पुरुषः* | करवाणि | करवाव | करवाम |

**अधोलिखितवाक्येषु क्रियापदानां स्थाने लोट्लकारस्य क्रियापदानि लिखन्तु –**

क. हे आन्तरतर ! मम आन्तरं विकसितं कुर्याः।

..................................................................................................................

ख. हे ईश्वर ! मम बन्धनं मुञ्चेः।

..................................................................................................................

ग. प्रभो ! मां सकलकर्मसु सञ्चारयेः।

..................................................................................................................

घ. भोः सृष्टिकर्तः ! मां निखिलसङ्गे योजयेः।

..................................................................................................................

ङ हे मानसचर ! मम हृदयम् उज्ज्वलं कुर्याः।

..................................................................................................................

## पाठ-विकासः

### 1.(क) कविपरिचयः

रवीन्द्रनाथठाकुरः श्रेष्ठः कविः कथाकारः, उपन्यासलेखकः, गीतकारः सङ्गीतरचनायां पटुः अभिनये कुशलः, नाटकरचनायां दक्षः, महान् शिक्षाविद् च आसीत्। तेन रचितगीतानां सङ्ख्या द्विसहस्रतः अपि अधिका अस्ति। स स्वयम् एव तेषां गीतानां स्वरलिपिं कृतवान्।

## ( ख ) काव्यपरिचयः

1913 तमे वर्षे तस्य 'गीताञ्जलिः' इति नाम्नी कृतिः नोबलपुरस्कारेण सम्मानिता अभवत् । अनेन पुरस्कारेण तस्य कीर्तिः सर्वेषु पश्चिमदेशेषु भारते च प्रसारम् अलभत ।

### बंगीयभाषायाम् मूलगीतम्

ऑन्तॉरो मॉमो बिकोशितो कॉरो
ऑन्तॉरोतॉरो हे

निर्मॉलो कॉरो, उज्जॉलो कॉरो,
शुन्दोरो कॉरो हे

जाग्रोतो कॉरो, उद्धॉतो कॉरो,
निर्भॉरो कॉरो हे

मोंगोल कॉरो, निरॉलॉशो
निःशॉशाय कॉरो हे

जुक्तो कॉरो हे, शॉबार शॉंगे
मुक्तो कॉरो हे बॉन्धो

शॉन्चार कॉरो, शॉकाल कॉर्मे
शान्तो तोमार छॉन्दो

चॉरोणोपॉद्दे मॉमो चित्तो
निश्पोन्दितो कॉरो हे

नोन्दितो कॉरो, नोन्दितो कॉरो,
नोन्दितो कॉरो हे ।